# shrIbhairavAShTakam 2

# શ્રીભૈરવાષ્ટકમ્ ૨

## Document Information

Text title : bhairavAShTakam 2

File name : bhairvAShTakam2.itx

Category : aShTaka, shiva

Location : doc_shiva

Author : Gargyamuni

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Latest update : June 30, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીભૈરવાષ્ટકમ્ ૨

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ શ્રીગુરવે નમઃ ॥

॥ શ્રીભૈરવાય નમઃ ॥

શ્રીભૈરવો રુદ્રમહેશ્વરો યો મહામહાકાલ અધીશ્વરોઽથ ।
યો જીવનાથોઽત્ર વિરાજમાનઃ શ્રીભૈરવં તં શરણં પ્રપદ્યે ॥ ૧॥

પદ્માસનાસીનમપૂર્વરૂપં મહેન્દ્રચર્મોપરિ શોભમાનમ્ ।
ગદાઽબ્જ પાશાન્વિત ચક્રચિહ્નં શ્રીભૈરવં તં શરણં પ્રપદ્યે ॥ ૨॥

યો રક્તગોરશ્ચ ચતુર્ભુજશ્ચ પુરઃ સ્થિતોદ્ભાસિત પાનપાત્રઃ ।
ભુજઙ્ગભૂયોઽમિતવિક્રમો યઃ શ્રીભૈરવં તં શરણં પ્રપદ્યે ॥ ૩॥

રુદ્રાક્ષમાલા કલિકાઙ્ગરૂપં ત્રિપુણ્ડ્રયુક્તં શશિભાલ શુભ્રમ્ ।
જટાધરં શ્વાનવરં મહાન્તં શ્રીભૈરવં તં શરણં પ્રપદ્યે ॥ ૪॥

યો દેવદેવોઽસ્તિ પરઃ પવિત્રઃ ભુક્તિઞ્ચ મુક્તિં ચ દદાતિ નિત્યમ્ ।
યોઽનન્તરૂપઃ સુખદો જનાનાં શ્રીભૈરવં તં શરણં પ્રપદ્યે ॥ ૫॥

યો બિન્દુનાથોઽખિલનાદનાથઃ શ્રીભૈરવીચક્રપનાગનાથઃ ।
મહાદ્ભૂતો ભૂતપતિઃ પરેશઃ શ્રીભૈરવં તં શરણં પ્રપદ્યે ॥ ૬॥

યે યોગિનો ધ્યાનપરા નિતાન્તં સ્વાન્તઃસ્થમીશં જગદીશ્વરં વૈ ।
પશ્યન્તિ પારં ભવસાગરસ્ય શ્રીભૈરવં તં શરણં પ્રપદ્યે ॥ ૭॥

ધર્મધ્વજં શઙ્કરરૂપમેકં શરણ્યમિત્થં ભુવનેષુ સિદ્ધમ્ ।
દ્વિજેન્દ્રપૂજ્યં વિમલં ત્રિનેત્રં શ્રીભૈરવં તં શરણં પ્રપદ્યે ॥ ૮॥

ભૈરવાષ્ટકમેતદ્ યઃ શ્રદ્ધા ભક્તિ સમન્વિતઃ ।

સાયં પ્રાતઃ પઠેન્નિત્યં સ યશસ્વી સુખી ભવેત્ ॥ ૯॥

॥ શ્રીગાર્ગ્યમુનિવિરચિતં ભૈરવાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*shrIbhairavAShTakam 2*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*